**दिनाङ्क: - 11.12.2024** **सायम्  - 06:20**

**इयम् आकाशवाणी**

**सम्प्रति वार्ताः श्रूयन्ताम्**

**मुख्यवार्ताः**

- प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां तमिलभाषीय-कवे: सुब्रहमण्य-भारती इत्येतस्य सम्पूर्ण-कार्य-सङ्ग्रहस्य विमोचनं कृतवान्। प्रोदीरितवान् यत् समृद्धभारतस्य प्रत्येकजनस्य च सशक्तीकरणाय सुब्रह्मण्य-भारती वर्यस्य दृष्टि: सर्वान् प्रेरयति।
- संसद: द्वयो: सदनयो: पक्षस्य विपक्षस्य च सांसदानां मध्ये कोलाहलकारणेन राज्यसभाया: कार्यजातम् आदिवसं यावत् तत्रैव लोकसभाया: कार्यजातं द्विवादनं यावत् स्थगितम्।
- अद्य दिल्ली-नगरे ऋतुकालस्य शैत्यतमः प्रातःकालः समंकित:।
- महिला-क्रिकेट् प्रतिस्पर्धायां, ऑस्ट्रेलियादलेन त्रि-स्पर्धानां एकदिवसीय-शृङ्खलाया: तृतीये अन्तिमे च द्वन्द्वे भारताय विजयाय नवनवत्यधिक-द्विशत-धावनाङ्कानां लक्ष्य: स्थापित:।

---

**प्रधानमन्त्री-सुब्रह्मण्यभारती**

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां तमिलभाषीय-कवे: स्वाधीनता-सेनानिन: च सुब्रहमण्य-भारती इत्येतस्य सम्पूर्ण-कार्य-सङ्ग्रहस्य विमोचनं कृतवान्। अस्मिन्नवसरे प्रधानमन्त्री सुब्रह्मण्य-भारती इत्येतस्मै श्रद्धाञ्जलिं समर्प्य उक्तवान् यत् देश: अद्य महानकवे: जयन्तीम् आमानयति।

श्रीमोदिना कथितं यत् महाकवे: सुब्रह्मण्य-भारती इत्येतस्य कार्यसङ्ग्रहस्य विमोचनं कृत्वा असौ सम्मानस्य अनुभवं करोति। प्रधानमन्त्रिणा प्रोदीरितं यत्-समृद्धभारतस्य प्रत्येकजनस्य च सशक्तीकरणाय सुब्रह्मण्य-भारती वर्यस्य दृष्टि: सर्वान् प्रेरयति।

---

**प्रधानमन्त्री -गीता जयन्ती**

प्रधानमन्त्री नरेन्द्रमोदी अद्य गीताजयन्त्यवसरे जनेभ्य: शुभकामना: प्रदत्तवान्। सामाजिकसञ्चार-पटले एकस्मिन् सन्देशे श्रीमोदिन लिखितं यत् अयं पवित्र-महोत्सव: भारतीय-संस्कृते:, आध्यात्मिकताया: परम्पराया: च मार्गदर्शनं कुर्वत: दिव्यशास्त्रस्य जन्मदिवसरूपेण आचर्यते। प्रधानमन्त्री भगवत: श्रीकृष्णस्य स्मरणं कृत्वा आशां व्यक्तीकृतवान् यत् भगवद्गीता सर्वेभ्य: कर्मयोगस्य मार्गं प्रदर्शयिष्यति।

---------------------------------------------

**प्रधानमन्त्री - हैकाथान्**

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य अवधानं दत्तं यत् यथा यथा देशः महता परिमाणेन आंकिकीय-रूपेण संयोजितो भवति तथा आन्तर्जालिक-अपराधस्य भीतिः अपि निरन्तरं वर्धमाना अस्ति इति। अस्य वर्षस्य स्मार्ट इण्डिया हैकाथान् इत्यस्य ग्राण्ड् फिनाले इत्यस्मिन् युव-आविष्कर्तृभिः सह वीडियो-कान्फ़रेन्सिङ्ग्-माध्यमेन वार्तालापं कुर्वन् प्रधानमन्त्री अवदत् यत् भारतं विश्वस्य प्रमुख-आंकिकीय-अर्थव्यवस्थासु अन्यतमम् अस्ति इति।

---------------------------------------------

**संसद**

संसद: द्वयो: सदनयो: पक्षस्य विपक्षस्य च सांसदानां मध्ये कोलाहलकारणेन राज्यसभाया: कार्यजातम् आदिवसं यावत् तत्रैव लोकसभाया: कार्यजातं द्विवादनं यावत् स्थगितम्। प्रथमस्थगनानन्तरं राज्यसभाया: कार्यजातं यदा मध्याह्ने द्वादश-वादने पुन: प्रारब्धं तदा सदनस्य नेता केन्द्रीयमन्त्री च जगत्-प्रकाश-नड्डा: अमेरिकादेशस्य जॉर्ज-सोरोस्-फाडण्डेशन इत्यनेन सह काङ्ग्रेसनेतृणां कथित-सम्बन्धस्य विषये सदने चर्चां याचितवान्। इत: प्राक् यदा अद्य प्रात: सदनस्य कार्यजातं प्रारब्धं तदा अध्यक्ष: जगदीप-धनखड़: विपक्षै: सांसदै: विभिन्नप्रकरणेषु प्रदत्त-स्थगन-प्रस्तावा: निराकृता:।

संसदीयकार्यमन्त्री-किरेन-रिजिजू राज्यसभाया: अध्यक्षं विरुध्य अविश्वास-प्रस्तावम् आलक्ष्य विपक्षस्य निन्दां कृतवान्।

-----------------------------------------------

## वित्तमन्त्री

वित्तमन्त्री निर्मला सीतारमण अद्य बलं प्रदत्तवती यत् वैश्विकशान्तिं पुन: स्थापयितुं विश्वस्य प्रशासनै: उद्योगै: च मिलित्वा कार्यं कुर्यु:। नवदिल्ल्यां CII इत्येतस्या: संस्थाया: वैश्विकार्थिक-नीतिमञ्चस्य उद्घाटनसत्रे उपस्थितजनान् सम्बोधयन्ती वित्तमन्त्री उक्तवती यत् अस्मिन् दशके वैश्विकप्राथमिकता सामान्यस्थिते: पुनर्स्थापनं भवेत्। सा अवदत् यत् युद्धानि व्यवधानानि च परिहर्तव्यानि यतोहि एतानि आपूर्ति-शृङ्खला-व्यवधानानां मुख्यकारणानि सन्ति। सा उक्तवती यत् सामान्यस्थिते: पुनर्स्थापनस्य दायित्वं सर्वेषाम् उद्योगानां, प्रशासनानां, नीति-निर्मातृणां, नागरिकाणां, नागरिक-मञ्चानां च वर्तते। वित्तमन्त्री बलं प्रदत्तवती यत्-अर्थव्यवस्थाया:, प्रौद्योगिक्या: वित्तस्य च सङ्गम: वैश्विकप्रगते: भविष्यम् आकारयति।

-----------------------------------------------

## बाङ्ग्लादेश

बाङ्ग्लादेशे अस्मिन् वर्षे अगस्तमासस्य पञ्च-दिनाङ्कात् आरभ्य अक्टूबरमासस्य द्वाविंशति-दिनाङ्कं यावत् अल्पसङ्ख्यकानां सम्बद्धानि आहत्य अष्टाशीति-प्रकरणानि पञ्जीकृतानि। ह्य: ढाकानगरे वार्ताहरान् संसूचयन् मुख्यपरामर्शदातु: प्रचारमाध्यमसम्बद्ध-सचिव: शफीकुल-आलम: उक्तवान् यत् एतेषु प्रकरणेषु सप्ततिजना: विष्टब्धा:। सुनामगञ्ज-नरसिंगडी-चट्टोग्राम-ढाका इत्येतेषु स्थलेषु अल्पसङ्ख्यकेषु सद्य: एव भवितानाम् आक्रमणानां चर्चां कृत्वा तेनोक्तं यत् यदि एतेषु स्थलेषु नूतनघटना: भवन्ति चेत् गृहीतानां प्रकरणानां च सङ्ख्या वर्धितुं शक्यते।

-----------------------------------------------

## राष्ट्रपति-पुरस्कार

राष्ट्रपति: द्रौपदी मुर्मु: अद्य नवदिल्ल्यां विज्ञान-भवने अस्य वर्षस्य राष्टिर्‌य-पञ्चायत-पुरस्कारं प्रदत्तवती। अनेन पुरस्कारेण मूलस्तरे समावेशि-सतत-विकासम् अग्रे वर्धयितुं पञ्चायतीराज इति संस्थानां प्रयासेभ्य: मान्यता प्रदत्ता। अस्मिन् वर्षे प्रतियोगितायां चतुर्नवति सहस्राधिक एक लक्ष

ग्राम-पंचायता: भागं गृहीतवन्त: अथ पञ्चचत्वारिंशत् ग्राम – पञ्चायतेभ्य: राष्ट्रपति: विभिन्न-श्रेणिषु पुरस्कारं प्रदत्तवती।

---

**तापमान**

अद्य दिल्ली-नगरे ऋतुकालस्य शैत्यतमः प्रातःकालः समंकित: , यत्र राष्ट्रिय-राजधान्याः सफदर जंग -स्थानके तापमानं चत्वारि दशमलव नव डिग्री सेल्सियस् मितं यावत् अभिलिखितम्।

---

**क्रिकेट**

महिला-क्रिकेट् प्रतिस्पर्धायां, ऑस्ट्रेलियादलेन त्रि-स्पर्धानां एकदिवसीय-शृङ्खलाया: तृतीये अन्तिमे च द्वन्द्वे भारताय विजयाय नवनवत्यधिक-द्विशत-धावनाङ्कानां लक्ष्य: स्थापित:।

**।।इति वार्ता:।।**